न कालस्तु विधीयते” इति मल०त० वाक्यात्। अद्भु-
तादिशान्तिश्च हेमाद्रिशान्तिकाण्डे शान्तिमयूखादौ दृश्या।

**शान्तिक** त्रि० शान्तये हितं ठक्। शान्तिसाधने होमादौ
तत्करणमुहूर्त्तादिकं मु०चि० उक्तं पी० ध० यथा
“क्षिप्रध्रुवान्त्यचरमैत्रमघासु शस्तं स्याच्छान्तिकञ्च सह
मङ्गलपौष्टिकाभ्याम्। खेऽर्के विधौ सुखगते तनुगे गुरौ,
नोमौढ्यादिदुष्टसमये, शुभदं निमित्ते”। “अथ शान्तिक-
पौष्टिकादिकर्मणि मुहूर्त्तं वसन्ततिलकेनाह। क्षिप्रेति
क्षिप्रादीनि मघान्तानि प्रसिद्धानि तेषु पौष्टिकं मङ्गलं
विनायकशान्त्यादि शान्तिकं दुष्टफलदमूलजन्मशान्त्युत्पातशा-
न्त्यादि एतानि कर्माणि कार्याणि उक्तञ्च दीपि-
कायाम्। “मित्रादित्यमघोत्तराश्रवणभिषक्स्वातीविर-
च्युच्युतस्तगाधीश्वरपूष्यपौष्णरविषु स्फीते तुषारत्विषि।
रिक्तां पर्व विहाय चौम्यदिवसे शस्ते न्टणां भूतये सर्वैः
शान्तिकपौष्टिकं निगदितं गर्गादिभिर्निश्चयात्” अथ
लग्नशुद्धिः तत्रार्के सूर्ये खे दशमे सति विधौ चन्द्रे
सुखगते चतुर्थस्थे गुरौ तनुगे लग्नस्थे सति शान्त्यादिकं
कर्म कार्यं उक्तञ्च रत्नमालायाम्। “पूर्णे चन्द्रे वेश्म४-
गेऽर्केऽम्बर१०स्थे लग्ने जीवे, वाक्पतेर्वासरे च। श्रीमत्या-
युष्याणि कार्याणि कार्याणीति” नोतच्छान्तिकादि मौढ्ये
गुरुशुक्रयोरस्तादिके बाल्यवार्द्धकसिंहस्थ गुर्वादिरूपे दुष्ट-
समयेऽपि न शुभदम्। तथा निमित्ते केत्वाद्युत्पातदर्शने
सति शुभदं उक्तञ्च दीपिकायाम्। शान्तिकर्माणि कुर्वीत-
रोगे नैमित्तिके तथा। गुरुभार्गवमौढ्येऽपि दोषस्तत्र
न विद्यते”। उक्तञ्च तत् “यतोऽस्तीदं शान्तिकं नैमित्ति
कम् “अनिमित्तकृता शान्तिर्निमित्तायोपजायते इति स्म-
रणात्। तत्र निमित्ते रोगरूपे केत्वाद्युत्पातान्तरदर्शन-
रूपे च भवति नैमित्तिकं तच्च बहुदिनव्यापके गुरु-
शुक्रास्तादिदोषेऽप्यवश्यं विधेयं यतो जन्मान्तरीयदुर-
दुष्टसूचकमिदं निमित्तमुत्पन्नं तस्य शान्त्या निराशादृष्ट-
भावदृष्टस्यापि निरासः। बहुदिनसाध्ये निर्दूषणे काले
क्रियमाणं शान्तिकं किञ्चिद्दुदुरदुष्टनाशकं यद्यपि भवति
तथापि तावद्भिर्दिनैर्दुरदृष्टस्य प्राबल्याद् दुःखप्राप्तिः
यथाल्पोऽप्यग्निरल्पेनैव जलेन शान्तो भवति तथा
सकलनगरदाहको महानग्निर्बहुभिर्युगपद् न्टहीतजल-
पूर्णघटैरेकदेशनिर्वापितोऽपि सकलोऽग्निर्ननिर्वाप्यते इ-
त्यर्थः सर्वथा मौढ्यादिदोषं विनैव यथा कथञ्चित्तकथित-
प्रकारेण दिनशुद्धिमङ्गीकृत्य शान्तिकाद्यवश्यं विधेयम्”।

**शाप** पु० शप–घञ्। (अनिष्टं भूयादित्येवम्) १आक्रोश-
रूपे २शपथे च मेदि०।

**शापास्त** पु० शाप एवास्त्रं यस्य। मुनौ त्रिका०।

**शाब्दबोध** पु०शब्देन निर्वृत्तः अण् कर्म०। अन्वयबोधे शब्द-
ज्ञानजन्ये पदार्थस्मृतिद्वारके ज्ञानभेदे न्यायमतम्। शा-
ब्दत्वं त्वनुभवत्वव्याप्यं जातिभेदः तद्बोधप्रकारादि
भाषा० उक्तं यथा “पदज्ञानन्तु करणं द्वारं तत्र पदा-
र्थधीः। शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।
लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः। आसत्तियो-
ग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते”। भाषा० सि०मु० विवृत-
मेतत् यथा
“शाब्दबोधप्रकारं दर्शयति। पदज्ञानन्त्विति। न तु
ज्ञायमानं पदं करणम् पदाभावेऽपि मौनिश्लोकादौ
शाब्दबोधात्। पदार्थधीरिति। पदजन्यपदार्थस्मरणं
व्यापारः। अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थो-
पस्थितावपि शाब्दबोधापत्तेः। तत्रापि वृत्त्या पद-
जन्यत्वं बोध्यम्। अन्यथा घटादिपदात् समवायसम्ब-
न्धेन यत्राकाशस्मरणं जायते तत्राकाशस्यापि शाब्द-
बोधापत्तेः। वृत्तिः शक्तिलक्षणान्यतरः सम्बन्धः।
अतैव शक्तिज्ञानस्योपयोगः। पूर्वं शक्तिग्रहाभावे पद-
ज्ञानेऽपि तत्सम्बन्धेन स्मरणानुपपत्तेः। पदज्ञानस्य
सम्बन्धिज्ञानविधयार्थस्मारकत्वम्। शक्तिश्च पदेन सह
पदार्थस्य सम्बन्धः। सा चास्माच्छब्दादयमर्थो बोद्धव्य
इतीश्वरेच्छारूपा। आधुनिके नाम्नि शक्तिरस्त्येव।
“एकादशेऽहनि पिता नाम कुर्यात्” इतीश्वरेच्छायाः
सत्त्वात्। आधुनिके तु सङ्केते न शक्तिरिति सम्प्रदायः।
नव्यास्तु ईश्वरेच्छा न शक्तिः किन्त्विच्छैव। तेन आधु-
निकसङ्केतेऽपि शक्तिरस्तीति वदन्ति”।

**शाब्दिक** पु० शब्दं शब्दसाधुताज्ञापकं शास्त्रं वेत्त्यधीते वा
ठक्। व्याकरणशास्त्रभिज्ञे।

**शामित्र** न० शम–णिच् इत्रच्। १पशुबन्धने। शमितुः
कर्म–अण्। यज्ञार्थपशुहननकर्तृभावे २तद्धनने च।

**शामीन** न०शम–ईनञ्।१मसाने २सु चि स्त्री ङीप् त्रि०कौ०

**शाम्बरी** स्त्री शम्बरेण निर्वृत्ता अण् ङीप्। मायायाम्
इन्द्रजालादौ अमरः। [जटा०।

**शाम्बविक** त्रि० शम्बूः पण्यमस्य ठक्। शाङ्खिके (शाँखारी)

**शाम्बु(म्बू)क** पु० श(म्बु)म्बूक+स्वार्थे अण्। शम्बुके
(शामुक) भरतः।